# श्री शिवपंचाक्षरि स्तोत्रं

नागेंद्रहाराय त्रिलोचनाय
भस्मांगरागाय महेश्वराय ।
नित्याय शुद्धाय दिगंबराय
तस्मै नकाराय नमः शिवाय ॥ 1

मंदाकिनी सलिल चंदन चर्चिताय
नंदीश्वर प्रमथनाथ महेश्वराय ।
मंदार मुख्य बहुपुष्प सुपूजिताय
तस्मै मकाराय नमः शिवाय ॥ 2

शिवाय गौरीवदनाब्ज बृंद-
सूर्याय दक्षाध्वर नाशकाय ।
श्री नीलकंठाय वृषध्वजाय
तस्मै शिकाराय नमः शिवाय ॥ 3

वशिष्ठ कुंभोद्भव गौतमार्य-
मुनींद्र देवार्चित शेखराय ।
चंद्रार्क वैश्वानर लोचनाय
तस्मै वकाराय नमः शिवाय ॥ 4

© 2022 Vedam Nadam

यक्षस्वरूपाय जटाधराय
पिनाक हस्ताय सनातनाय ।
दिव्याय देवाय दिगंबराय
तस्मै यकाराय नमः शिवाय ॥ 5

पंचाक्षरमिदं पुण्यं यः पठेच्छिव सन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

॥ इति श्रीशिवपंचाक्षरि स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam